# Purusharthanirnayah

# પુરુષાર્થનિર્ણયઃ

## Document Information

Text title : puruShArthanirNayaH

File name : puruShArthanirNayaH.itx

Category : misc, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_z_misc_general

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# પુરુષાર્થનિર્ણયઃ

પુરુષાર્થદાનદક્ષં પુરુહૂતપ્રમુખનિર્જરારાધ્યમ્ ।
પુરુષાર્થસિદ્ધયેઽહં પુરુષં કૃષ્ણાદ્યપિઙ્ગલં નૌમિ ॥ ૧॥

તત્ર તાવત્કઃ પુરુષાર્થો નામ? ન તાવદનુકૂલપુત્રમિત્રકલત્રાદિઃ; તદનિત્યત્વસ્ય પ્રત્યક્ષસિદ્ધત્વાત્ । ન ચ “એતત્ત્રયં જગતિ પુણ્યકૃતો લભન્તે” ઇતિ તસ્યાપિ સુકૃતસાધ્યત્વેન નિત્યત્વમિતિ શઙ્ક્યં; ન હિ જલજન્યત્વસામ્યેઽપિ બુદ્બુદતરઙ્ગફેનવારિજાનાં સ્થિરત્વસામ્યમસ્તિ; તસ્માદ્ધર્માર્ધ-કામમોક્ષાશ્ચત્વારઃ પુરુષાર્થાઃ । તત્ર ધર્મો નામ–આશુવિનાશિનાં વિહિતકર્મણાં કાલાન્તરભાવિફલજનકત્વાન્યથાનુપપત્ત્યા કલ્પ્યમાનોઽદૃષ્ટપદાર્થવિશેષઃ । તથા હિ–યાગગઙ્ગાસ્નાનશિવપૂજાદીનાં હવિઃપ્રક્ષેપણ-ગઙ્ગાજલમજ્જનશિવલિઙ્ગાદિષુ પુષ્પક્ષીરાદિસમર્પણાદિરૂપાણાં યાવત્કાર્યોત્પાદાસ્થાયિત્વસ્ય સાર્વલૌકિકત્વાત્તત્કલ્પને તુ ફલાવ્યવહિતપ્રાક્ક્ષણવૃત્તિસ્વસ્વવ્યાપારાન્યતરકત્વરૂપફલ-જનકત્વસ્ય કાલાન્તરકૃતકર્મણામપિ સૂપપાદકત્વાત્ । અર્થો નામ-પૂર્વોક્તધર્માનુકૂલયાગાદિસાધનીભૂતધનધાન્યાદિઃ । કામસ્તુ-ઉક્તધર્મજનકકર્મસુ પ્રવર્તકઃ “ધર્મો મે ભૂયાત્” ઇતીચ્છારૂપઃ । ન તુ નિષિદ્ધકર્મકારકઃ કામઃ, તસ્ય પુરુષાર્થભાવાત્પ્રત્યુત પુરુષદુઃખહેતુત્વાત્ । કિઞ્ચ, ભગવદ્ગીતાયાં ભગવાનપ્યેવમાહ–
“ધર્મ્માવિરુદ્ધો ભૂતેષુ કામોઽસ્મિ
ભરતર્ષભ” ઇતિ ।

મોક્ષસ્તુ–તત્ત્વજ્ઞાનૈકસાધ્યઃ । તત્સ્વરૂપમુન્તરત્ર વર્ણ્યતે ॥

અત્રેદં ચિન્ત્યતે–ચતુર્ષ્વપ્યેતેષુ કઃ પરમ ઇતિ । ન ચ

પુરુષાર્થત્વાવિશેષાચ્ચત્વારોઽપીમે સમાના એવેતિ નિશ્ચેતું શક્યાઃ ।
ન હિ મનુષ્યત્વાવિશેષેઽપિ સર્વેઽપિ મનુષ્યાઃ સમાના ઉપલભ્યન્તે;
કશ્ચિત્પ્રભુઃ, કશ્ચિદ્ભૃત્યઃ, કશ્ચિત્સુખી, કશ્ચિદ્દુઃખીતિ
ભેદદર્શનાત્ । તસ્માત્પ્રાગ્ પુરુષાર્થત્વાવિશેષેઽપિ ચિન્ત્યમેતેષુ
પારમ્યમિતિ । ન ચાર્થકામૌ પરમૌ, તયોર્ધર્મહેતુત્વેન ધર્મ
એવોપક્ષીણતયા સ્વતઃ પુરુષાર્થત્વાભાવાત્ । અત એવ ન ધર્મોઽપિ પરમઃ
પુમર્થઃ; તસ્ય સ્વર્ગાદિસાધનત્વેનોપસર્જનત્વાત્ । તથા હિ શ્રુતિઃ –
“જ્યોતિષ્ટોમેન સ્વર્ગકામો યજેત” “વાયવ્યશ્વેતમાલભેત
ભૂતિકામઃ” ઇતિ સ્વર્ગાદિસાધનત્વમાહ ધર્મસ્ય । ન ચેયં શ્રુતિર્ન
“ધર્મસ્ય સ્વર્ગકારણત્વમાહ,” અપિ તુ જ્યોતિષ્ટોમાદેરિતિ વાચ્યમ્ ।
યાગાદેર્ધર્મવ્યાપારકત્વસ્યાવશ્યકલ્પ્યતયા ધર્મસ્ય સ્વર્ગકારણતાયા
ધર્મિગ્રાહકમાનસિદ્ધત્વાત્ । ન ચૈતેષાં ત્રયાણાં પુરુષાર્થત્વમપિ
સમ્ભવતિ ।

તથા હિ–
પુરુષાર્થો નામ–વસ્તુતઃ સુખમ્, દુઃખાભાવો વા । તથા ચ
લોકેઽનુભવઃ– “ઇષ્ટં મે ભૂયાદનિષ્ટં મે મા ભૂત્”
ઇતિ । ન ચેમે ત્રયઃ સુખં દુઃખાભાવો વા । તર્હિ, કથમેતેષાં
પુરુષાર્થકોટિપ્રવિષ્ટત્વમિતિ ચેત્, તત્સાધનત્વાદિતિ બ્રૂમઃ । યથા
લાઙ્ગલસ્ય જીવનત્વાભાવેઽપિ જીવનસાધનત્વેન “લાઙ્ગલં
જીવનમ્” ઇતિ પ્રયોગઃ, તદ્વત્પુરુષાર્થસાધનત્વેનૈતેષુ
પુરુષાર્થપદપ્રયોગઃ । કિઞ્ચૈતેષામનિત્યત્વાદપિ ન
પરમપુરુષાર્થત્વમ્ । તથા હિ-અર્થકામયોસ્તાવત્પ્રત્યક્ષેણૈવાનિત્યત્વમ્ ।
ધર્મસ્ય ત્વતીન્દ્રિયત્વેન શ્રુત્યા સ્મૃત્યા ચાવગમ્યતે । તથા ચ
શ્રુતિઃ– “યદ્યથેહ કર્મચિતો લોકઃ ક્ષીયતે, એવમેવામુત્ર
પુણ્યચિતો લોકઃ ક્ષીયતે” ઇતિ । સ્મૃતિશ્ચ- “ક્ષીણે
પુણ્યે મર્ત્યલોકં વિશન્તિ” ઇતિ । તર્હિ કઃ પરમપુરુષાર્થ ઇતિ
ચેન્મોક્ષ એવેત્યવેહિ । તથા હિ– તસ્ય “બ્રહ્મવિદાપ્નોતિ પરમ્”
ઇત્યાદિશ્રુત્યા સુખસ્વરૂપત્વસ્ય, “તરતિ શોકમાત્મવિત્” ઇત્યાદ્યયા
ચ દુઃખનિવૃત્તિરૂપત્વસ્ય ચ પ્રતિપાદનાત્સ્વતઃ પુમર્થત્વમ્, નિત્યત્વં
ચ “ન સ પુનરાવર્તતે” “તેષાં ન પુનરાવૃત્તિઃ”
“એતેન પ્રતિપદ્યમાના ઇમં માનવમાવર્તં નાવર્તન્તે”

ઇત્યાદિશ્રુતિભ્યઃ ॥

“આબ્રહ્મભુવનાલ્લોકાઃ પુનારાવર્તિનોઽર્જુન ।”

“મામુપેત્ય પુનર્જન્મ દુઃખાલયમશાશ્વતમ્ ।

નાપ્નુવન્તિ મહાત્માનઃ સંસિદ્ધિં પરમાં ગતાઃ ॥”

“ઇદં જ્ઞાનમુપાશ્રિત્ય મમ સાધર્મ્યમાગતાઃ ।

સર્ગેઽપિ નોપજાયન્તે પ્રલયે ન વ્યથન્તિ ચ ॥”

“યદ્ગત્વા ન નિવર્તન્તે તદ્ધામ પરમં મમ ।”

ઇત્યાદિસ્મૃતિભ્યશ્ચ । કિઞ્ચ, અનિત્યવિલક્ષણત્વાદપિ નિત્યત્વમ્ । લોક ઉત્પાદ્યપ્રાપ્યસંસ્કાર્યવિકાર્યાણામનિત્યત્વં દૃષ્ટમ્ । ન ચાસૌ મોક્ષ ઉત્પાદ્યઃ; નિત્યો હિ મોક્ષઃ સર્વૈર્મોક્ષવાદિભિરભ્યુપગમ્યતે । નાપિ પ્રાપ્યઃ, આત્મસ્વરૂપત્વેન નિત્યાપ્તત્વાત્ । નાપિ સંસ્કાર્યઃ, નિત્યશુદ્ધનિરતિશયત્વાન્મોક્ષસ્ય । નાપિ વિકાર્યઃ, કૂટસ્થબ્રહ્મસ્વરૂપત્વાન્મોક્ષસ્ય । તસ્માન્નિત્યત્વાત્સ્વતઃ પુમર્થત્વાચ્ચ મોક્ષ એવ પરમપુરુષાર્થઃ । ન ચ “અક્ષય્યં હ વૈ ચાતુર્માસ્યયાજિનઃ સુકૃતમ્” “અપામ સોમમમૃતા અભૂમ” ઇત્યાદિશ્રુતિભિઃ કર્મફલસ્યાપિ નિત્યત્વપ્રતિપાદનાત્કથં મોક્ષસ્યૈવ નિત્યફલત્વમિતિ વાચ્યમ્; અસ્યાઃ શ્રુતેઃ “યત્કૃતકં તદનિત્યમ્” ઇતિ ન્યાયોપેતયા “તદ્યથેહ” ઇત્યાદિશ્રુત્યા બાધેન અત્રત્યાક્ષય્યામૃતપદયોઃ આભૂતસમ્પ્લવસ્થાયિસ્થાનપરત્વસ્યૈવ વક્તવ્યત્વાત્ ।

તથા ચ સ્મૃતિઃ—

“આભૂતસમ્પ્લવં સ્થાનમમૃતત્વં હિ ભાષ્યતે” । ઇતિ ।

ઇત્થં હિ વ્યવસ્થા-શ્રુતિસ્મૃત્યોર્વિરોધે ॥ ◌ઉસારેણ સ્મૃતિર્નેયા, શ્રુત્યોઃ પરસ્પરં વિરોધે ન્યાયોપેતશ્રુત્યનુસારેણ શ્રુત્યન્તરં નેયમિતિ । તસ્માન્મોક્ષ એવ નિત્ય ઇતિ સિદ્ધમ્ ॥ ,

મોક્ષો નામ-સાલોક્યસામીપ્યસારૂપ્યસાયુજ્યકૈવલ્યભેદેન પઞ્ચવિધઃ ।
“તત્ર સાલોક્યં તત્તદુપાસ્યદેવતાવાસસ્થાનભૂતલોકપ્રાપ્તિઃ ।
સામીપ્યમુપાસ્યદેવતાસમીપવર્તનમ્ । સારૂપ્યં દેવતાસમાનાકારદેહપ્રાપ્તિઃ ।
સાયુજ્યં સગુણસ્ય દેવતારૂપસ્ય અહઙ્ગ્રહેણોપાસનાં કુર્વતઃ ઉપાસ્ય-દેવતાતાદાત્મ્યમ્ । કૈવલ્યં તુ સચ્ચિદાનન્દનિત્યશુદ્ધબુદ્ધમુક્તસ્વભાવ-

પ્રત્યગભિન્નકૂટસ્થબ્રહ્મસ્વરૂપેણાવસ્થાનમ્ । ઇદમેવાવિદ્યાનિવૃત્તિપદેના-
પ્યભિધીયતે । તથા ચોક્તમ્-
"અવિદ્યાસ્તમયો મોક્ષઃ સા ચ બન્ધ ઉદાહૃતઃ । " ઇતિ ।
"નિવૃત્તિરાત્મા મોહસ્ય જ્ઞાતત્વેનોપલક્ષિતઃ ।" ઇતિ ચ ।
અપિ ચ,
"તસ્માદવિદ્યાસ્તમયો નિત્યાનન્દપ્રતીતિતઃ ।
નિઃશેષદુઃખોઽભેદાચ્ચ પુરુષાર્થઃ પરો મતઃ ॥" ઇતિ ।

ઇયં કૈવલ્યરૂપા મુક્તિરેવ મુખ્યા । તથા ચ સૂતસંહિતાયાં
સ્વસ્વરૂપાવસ્થાનમુક્તિં પ્રકૃત્ય–
"ષડ્ભાવવિક્રિયાહીના શુભાશુભવિવર્જિતા ।
સર્વદ્વન્દ્વવિનિર્મુક્તા સત્યવિજ્ઞાનરૂપિણી ॥

કેવલં બ્રહ્મરૂપોક્તા સર્વદા સુખલક્ષણા ।
ન હેયા નાપ્યુપાદેયા સર્વસમ્બન્ધવર્જિતા ॥

ન દૃષ્ટા ન શ્રુતા વિષ્ણો ન ચાસ્વાદ્યા ન તર્કિતા
સર્વાવરણનિર્મુક્તા ન વિજ્ઞેયા નિરાશ્રયા ॥

વાચ્યવાચકનિર્મુક્તા લક્ષ્યલક્ષણવર્જિતા ।
સર્વેષાં પ્રાણિનાં સાક્ષાદાત્મભૂતા સ્વયમ્પ્રભા ॥

પ્રતિબન્ધવિનિર્મુક્તા સર્વદા પરમાર્થતઃ ।
અવિચારદશાયાં તુ પ્રતિબદ્ધા સ્વમાયયા ॥

એષૈવ પરમા મુક્તિઃ પ્રોક્તા વેદાર્થવેદિભિઃ ।
અન્યાશ્ચ મુક્તયઃ સર્વા અપરાઃ પરિકીર્તિતાઃ ॥ " ઇતિ ।

ન ચાન્યાસુ સાલોક્યાદિરૂપાસુ કથં મુક્તિશબ્દપ્રયોગ ઇતિ વાચ્યમ્;
તાઃ પ્રાપ્તાનાં પુનરાવૃત્ત્યભાવેન ક્રમેણ મુખ્યમુક્તિદર્શનાત્તાસુ
મુક્તિશબ્દોપચારઃ ।
તથા ચોક્તમ્–
"બ્રહ્મણા સહ તે સર્વે સમ્પ્રાપ્તે પ્રતિસઞ્ચરે ।
પરસ્યાં તે મહાત્માનઃ પ્રવિશન્તિ પરં પદમ્ ॥" ઇતિ ।

ન ચાસ્યાઃ કૂટસ્થબ્રહ્મસ્વરૂપાયા મુક્તેઃ સ્વતઃસિદ્ધતયા તદર્થં
મુમુક્ષૂણાં ગુરૂપસદનવિચારાદિષુ પ્રવૃત્તિર્ન સ્યાદિતિ વાચ્યમ્;

તસ્યાઃ સ્વતઃસિદ્ધત્વેઽપિ વિસ્મૃતકણ્ઠચામીકરન્યાયેનાજ્ઞાતત્વેન તત્પ્રાપ્ત્યૈ મુમુક્ષૂણાં વિચારાદિષુ પ્રવૃત્ત્યુપપત્તેઃ । વિસ્મૃતકણ્ઠચામીકરન્યાયસ્ત્વેવં-કશ્ચિત્પુરુષઃ સ્વકણ્ઠસ્થમેવ ચામીકરં વિસ્મૃત્ય “અહો મદીયશ્ચામીકરઃ કુત્ર વા સ્થાપિતઃ કેન વાપહૃતઃ” ઇતીતસ્તતઃ પર્યટન્કુત્રાપ્યલબ્ધ્વા બહુધા શોચંસ્તિષ્ઠતિ । અત્રાન્તરે કશ્ચનાગત્ય ચૂતે- “તાવકે કણ્ઠ એવ ખલુ ચામીકરો વર્તતે, કિમર્થં ભવાન્ મહાન્તં શોકમાપન્નઃ” ઇતિ । સ તદ્વાક્યશ્રવણાનન્તરં યથા સ્વકણ્ઠસ્થમેવ ચામીકરં જ્ઞાત્વા અલબ્ધસ્ય લાભાદિવ તુષ્યતીતિ । અનેન ન્યાયેન સ્વતઽસિદ્ધાપીયં મુખ્યા મુક્તિરાત્મસ્વરૂપા અજ્ઞાતત્વેન અલબ્ધેવ સતી સ્વલાભાય કારણમપેક્ષત એવેતિ યુક્તા તદર્થં મુમુક્ષૂણાં પ્રવૃત્તિઃ । કારણં તુ જ્ઞાનમેવ; “નાન્યઃ પન્થા વિદ્યતેઽયનાય” “તરતિ શોકમાત્મવિત્” । “નાસ્ત્યકૃતઃ કૃતેન । તદ્વિજ્ઞાનાર્થં સ ગુરુમેવાભિગચ્છેત્” બ્રહ્મવિદાપ્નોતિ પરમ્ “બ્રહ્મવિદ્બ્રહ્મૈવ ભવતિ” “સ યો હ વૈ તત્પરમં બ્રહ્મ વેદ બ્રહ્મૈવ ભવતિ” ઇત્યાદિશ્રુતિભ્યઃ ॥

“બહૂનાં જન્મનામન્તે જ્ઞાનવાન્માં પ્રપદ્યતે ।”
“તતો માં તત્ત્વતો જ્ઞાત્વા વિશતે તદનન્તરમ્ ॥”
ઇત્યાદિસ્મૃતિભ્યશ્ચ । તજ્જ્ઞાનં કીદૃશમિત્યપેક્ષાયાં અપરોક્ષાનુભૂતૌ શ્રીમદ્ભગવત્પાદૈઃ–
“બ્રહ્મૈવાહં સમઃ શાન્તઃ સચ્ચિદાનન્દલક્ષણઃ ।
નાહં દેહો હ્યસદ્રૂપો જ્ઞાનમિત્યુચ્યતે બુધૈઃ ॥

નિર્વિકારો નિરાકારો નિરવદ્યોઽહમવ્યયઃ ।
નાહં દેહો હ્યસદ્રૂપો જ્ઞાનમિત્યુચ્યતે બુધૈઃ ॥

નિરામયો નિરાભાસો નિર્વિકલ્પોઽહમાતતઃ ।
નાહં દેહો હ્યસદ્રૂપો જ્ઞાનમિત્યુચ્યતે બુધૈઃ ॥

નિર્ગુણો નિષ્ક્રિયો નિત્યો નિત્યમુક્તોઽહમચ્યુતઃ ।
નાહં દેહો હ્યસદ્રૂપો જ્ઞાનમિત્યુચ્યતે બુધૈઃ ॥

નિર્મલો નિશ્ચલોઽનન્તઃ શુદ્ધોઽહમજરોઽમરઃ ।
નાહં દેહો હ્યસદ્રૂપો જ્ઞાનમિત્યુચ્યતે બુધૈઃ ॥ ” ઇતિ ।

"તત્ત્વમસિ" "અહં બ્રહ્માસ્મિ" "અયમાત્મા બ્રહ્મ"
"પ્રજ્ઞાનં બ્રહ્મ" ઇતિ મહાવાક્યજન્યાખણ્ડાકારવૃત્ત્યપરનામકમ્ ।
તત્પ્રાપ્ત્યુપાયસ્તુ શ્રુતૌ "આત્મા વા અરે દ્રષ્ટવ્યઃ શ્રોતવ્યો
મન્તવ્યો નિદિધ્યાસિતવ્યઃ" ઇતિ, "શાન્તો દાન્ત ઉપરતસ્તિતિક્ષુઃ
શ્રદ્ધાવિત્તો ભૂત્વાઽઽત્મન્યેવાત્માનં પશ્યેત્" ઇત્યાદિવાક્યૈરુદ્ઘુષ્યતે ।
પાદ્મે શિવગીતાયાં ચ–
"કથં ભગવતો જ્ઞાનં શુદ્ધં મર્ત્યસ્ય જાયતે ।
તત્રોપાયં હર બ્રૂહિ મયિ તેઽનુગ્રહો યદિ ॥"
ઇતિ શ્રીરામેણ પૃષ્ટઃ સન્ શ્રીભગવાનાહ–
"વિરજ્ય સર્વભૂતેભ્ય આવિરિઞ્ચિપદાવધિ ।
ઘૃણાં વિતત્ય સર્વત્ર પુત્રમિત્રાદિકેષ્વપિ ॥

શ્રદ્ધાલુર્મુક્તિશાસ્ત્રેષુ વેદાન્તજ્ઞાનલિપ્સયા ।
ઉપાયનકરો ભૂત્વા ગુરું બ્રહ્મવિદં વ્રજેત્ ॥

સેવાભિઃ પરિતોષ્યૈનં ચિરકાલં સમાહિતઃ ।
સર્વવેદાન્તવાક્યાર્થં શ‍ૃણુયાત્સુસમાહિતઃ ॥

સર્વવેદાન્તવાક્યાનાં મયિ તાત્પર્યનિશ્ચયમ્ ।
શ્રવણં નામ તત્પ્રાહુઃ સર્વે તે બ્રહ્મવાદિનઃ ॥

લોહમણ્યાદિદૃષ્ટાન્તયુક્તિભિર્યદ્વિચિન્તનમ્ ।
તદેવ મનનં પ્રાહુર્વાક્યાર્થસ્યોપબૃંહણમ્ ॥

નિર્મોહો નિરહઙ્કારઃ સમઃ સઙ્ગવિવર્જિતઃ ।
સદા શાન્ત્યાદિયુક્તઃ સન્નાત્મન્યાત્માનમીક્ષતે ॥

યત્સદા ધ્યાનયોગેન તન્નિદિધ્યાસનં સ્મૃતમ્ ।
સર્વકર્મક્ષયવશાત્સાક્ષાત્કારોઽપિ ચાત્મનઃ ॥

કસ્યચિજ્જાયતે શીઘ્રં ચિરકાલેન કસ્યચિત્ ।" ઇતિ ।

તસ્માદ્બ્રહ્મજ્ઞાનૈકસાધ્યઃ સ્વસ્વરૂપાવસ્થાનલક્ષણો
મોક્ષ એવ પરમઃ પુરુષાર્થ ઇતિ સર્વં ચતુરસ્રમ્ ॥

પુરુષાર્થનિર્ણયોઽયં ગુરુવરકૃપયા મયા વ્યરચિ ।
વીક્ષ્ય પ્રયાન્તુ મોદં વિદ્વાંસો વીતમત્સરાસ્તમિમમ્ ॥

ઇતિ શ‍ૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-

ભારતીસ્વામિભિઃ વિરચિતઃ પુરુષાર્થનિર્ણયઃ સમાપ્તઃ ।

Proofread by PSA Easwaran

*Purusharthanirnayah*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*